# MA 1st Semester Examination, 2010

## SANSKRIT

PAPER — SAN-101

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. निम्नाङ्कितेषु मन्त्रेषु किमपि मन्त्रद्वयमृषिच्छन्दोदेवतानिर्देशपूर्वकं सायणदिशा सरलसुरगिरा (देवनागरीलिप्या) व्याख्यायताम् — 6 × 2

(*a*) अग्निर्होता कविक्रतुः सत्यश्चित्र श्रवस्तमः ।
देवो देवेभिरागमत् ॥

(*b*) वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ।
उरुची सोमपीतये ॥

(*c*) उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनी ।
पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे ॥

(*d*) सत्यं बृहद् ऋतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुलोकं पृथिवी नः कृणोतु ॥

(*e*) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु ॥

**2.** अधोनिर्दिष्टं भाष्यवचनमेकं संस्कृतभाषायां व्याख्यायताम् (देवनागरीलिपिमनुश्रित्य) — 6 × 1

(*a*) ''अग्निमील'' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम् ।

(*b*) प्रातः सवने वैश्वदेवग्रहणादूर्ध्वं प्रउग शस्त्रे होत्रा संशनीयम् ।

*अथवा*

अधोनिर्दिष्टयोः मन्त्रयोः कस्यचिद् <u>एकस्य</u> भावार्थः संस्कृतभाषायां देवनागरीलिपिमाश्रित्य लेख्यः —

(*a*) एतावानस्य महिमातो ज्यायांश्च पुरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

(*b*) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्तिविदथेषुधीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनःशिवसंकल्पमस्तु ॥

**3.** अधस्तनेषु पदेषु कस्यचिद् द्वयोः व्याकरणप्रक्रियया साधनरीतिः संस्कृतभाषायां प्रदश्र्यताम्— 2 × 2

(*i*) दाशुषे

(*ii*) आगमत्

(*iii*) एमसि

(*iv*) श्रुधी

(*v*) अश्नवत् ।

**4.** शिवसङ्कल्पसूक्तानुसारं मनसः स्वरूपं प्रतिपाद्यताम् । 8 × 1

*अथवा*

अग्नेर्वायोर्वा चारित्रिकवैशिष्ट्यं प्रतिपाद्यताम् ।

**5.** शतपथब्राह्मणोक्तस्य पञ्चमहायज्ञस्य स्वरूपनिरूपणपूर्वकं तात्पर्यं विशदीक्रियताम् । 10 × 1

*अथवा*

अधस्तनयोः <u>द्वयोः</u> व्याख्या कार्या —

(*i*) कलिःशयानो भवति सञ्जिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति ॥

(*ii*) चरन्वै मधु विन्दति चरन्स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति ॥